Checked 20

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 994 विषय पुराण
नाव. श्रीपार्थिवलिंगपूजा (MSS)
लेखक/लिपीकार —
पृष्ठ 4 काळ — पूर्ण/अपूर्ण

अथ श्रीपार्थिवलिंग पूजा

॥ अथ पार्थिव लिंगपूजा ॥

॥श्रीगणेशायनमः॥ श्री सांबसदाशिवायनमः॥ कृतनित्यक्रियः
धृतत्रिपुण्ड्ररुद्राक्षमालः आचम्य प्राणानायम्य देशकालौ संकीर्त्य
एवं गुणविशेषण० श्री सांब सदाशिव देवताप्रीत्यर्थं पूर्व संक-
ल्पित संख्यापूर्तये अद्य अमुक संख्यापरिमित पार्थिव लिंग पूज-
नं करिष्ये ।. तत्रादौ निर्विघ्नता सिध्द्यर्थं महागणपति पूजनं स्मरणं
वा करिष्ये इति संकल्प्य. गणपति पूजनं स्मरणं वा कृत्वा आ-
सनविधिं कलशाराधनम् पुरुषसूक्त शिवपंचाक्षरीन्यासान्विधाय
अग्रे संस्थापित महान्मृत्पिंडात् 'ॐ हरायनमः' इति मन्त्रेण.
अल्प मृदं गृहीत्वा 'ॐ महेश्वरायनमः" इति मंत्रेणांगुष्ठमात्राद्दधि

कं लिंगं कृत्वा। लिंगमस्तके अक्षतान्समर्प्य 'ॐ शूलपाणये नमः' इति मंत्रेण पीठे लिंगं संस्थापयेत्। एवं यथासंख्यं लिंगं कृत्वा प्राण प्रतिष्ठां कृत्वा लिंगेषु शिवमावाह्य ध्यायेत्। अथवा 'सिध्दे मंत्राः प्रयोक्तव्याः' इति न्यायेन साक्षतानि यथा संख्यानि लिंगानि पीठे संस्थाप्य पूर्ववत्संकल्पादि न्यासांतं कृत्वा, लिंगोपरिहस्तं संस्थाप्य पठेत् 'ॐ हराय नमः' इति मृदाहरणं 'ॐ महेश्वराय नमः', इति संघट्टनं कृत्वा लिंग करणं 'ॐ शूलपाणये नमः' इति लिंगस्थापनं। ~~इति लिंगोपरि हस्तं संस्थाप्य पठित्वा~~, (ततः प्राण प्रतिष्ठां कुर्यात्)। —

अस्य श्री प्राणप्रतिष्ठा मंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः। ऋग्यजुःसामानि छंदांसि। परा प्राणशक्तिर्देवता। आं बीजं। ह्रीं शक्तिः। क्रों कीलकम्। एतेषु पार्थिव लिंगेषु सांब शिव प्राण प्रतिष्ठापने विनियोगः। (लिंगोपरि पाणितलं कृत्वा)। ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं क्षं अः क्रों ह्रीं आं श्रीसांबशिवस्य प्राणा इह प्राणाः। ॐ आं... श्री सांबसदाशिवस्य जीव इह स्थितः। ॐ आं... श्रीसांबशिवस्य सर्वेन्द्रियाणि। ॐ आं... श्री सांब शिवस्य वाङ्मनस्त्वक्चक्षुश्रोत्र जिव्हाघ्राण वाक्पाणि पाद पायूपस्थानि, स्वस्थाने इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा।

ॐ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं। ज्योक्पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति॥ गर्भाधानादि पंचदशसंस्कारसिध्यर्थं पंचदश प्रणवावृत्तीः करिष्ये। ॐ पंचदशवारं जप्त्वा। रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढाकराब्जैः। पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान्॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या। देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ १॥ इति प्राणप्रतिष्ठां कृत्वा ध्यायेत्। ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं। रत्नाकल्पोज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम्॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं। विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचव ~~क्त्रं~~क्त्रं त्रिनेत्रम्॥ १॥ ॐ सहस्रशीर्षा० ॐ पिनाकधृशे नमः श्रीसांबसदाशिव इहागच्छ इहतिष्ठ इह संन्निहितो भव। स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं। तावत्त्वं प्रीतिभावेन लिंगेस्मिन्सन्निधो भव॥ इति आवाहनम्। ॐ पुरुषएवेदं० ॐ नमः शिवाय श्रीसांबसदाशिवाय आसनं समर्पयामि। ॐ एतावानस्य० ॐ नमः शिवाय श्रीसांबसदाशिवाय पाद्यं सम०। ॐ त्रिपादूर्ध्व० ॐ नमः शिवाय श्रीसांबसदाशिवाय अर्घ्यं स०।

ॐ तस्माद्विराळ० ॐ नमः शिवाय श्रीसांबसदाशिवाय ।
आचमनं स० । ॐ यत्पुरुषेण० ॐ पशुपतये नमः । ॐ
नमः शिवाय श्रीसांबसदाशिवाय स्नानीयं सम० । ततः
पंचामृतेन गंधोदकेन शुद्धोदकेन च स्नापयित्वा पूर्व पूजां कृत्वा
रुद्राध्यायेन पुरुषसूक्तेन चाभिषिच्य आचमनं दत्वा ॐ तंय०
ॐ नमःशिवाय श्रीसांबसदाशिवाय वस्त्रं सम० । ॐ तस्माद्य०
ॐ नमः शिवाय श्रीसांबसदाशिवाय यज्ञोपवीतं सम० । ॐ तस्मा
यज्ञात्सर्वहुतऋच० ॐ नमःशिवाय श्रीसांबसदाशिवाय चंदनं स०
अक्ष०सम० । ॐ तस्मादश्वा० ॐ नमः शिवाय श्रीसांबसदाशिवाय
पुष्पाणि समर्पयामि । ॐ यत्पुरुषं० ॐ नमःशिवाय श्रीसांब-

सदाशिवाय धूपमाघ्रापयामि । ॐ ब्राह्मणोस्य० ॐ नमः
शिवाय श्रीसांबसदाशिवाय दीपं दर्शयामि । ॐ चंद्रमा०
ॐ नमः शिवाय श्रीसांबसदाशिवाय नैवेद्यं सम० । फलं
तांबूलं दक्षिणां च दत्वा नीराजनं कृत्वा मंत्रपुष्पांजलिं च
दत्वा प्रदक्षिणाः नमस्कारान् कृत्वा 'शर्वाय क्षितिमूर्तये नमः ।
भवाय जलमूर्तये नमः । रुद्रायाग्निमूर्तये नमः । उग्राय वायुमूर्तये
नमः । भीमायाकाशमूर्तये नमः । पशुपतये यजमानमूर्तये नमः ।
महादेवाय सोममूर्तये नमः । ईशानाय सूर्यमूर्तये नमः । इति
पूर्व इशानी क्रमेण वामावर्तेन आग्नेयी पर्यंत वेद्यां अष्ट

मूर्त्ति पूजां कृत्वा । आवहनं नजामीति क्षमापयित्वा । नमस्ते
भगवन्रुद्र भास्करामित तेजसे । पार्थिवानांच लिंगानां यन्मया
पूजनं कृतं । तेन श्रीभगवान्रुद्रो वांच्छितार्थं प्रयच्छतु ॥
इति स्तुत्वा ॐ महादेवायनमः इति विसर्जयेत् ।

[OrderDescription]
,CREATED=14.08.19 16:29
,TRANSFERRED=2019/08/14 at 16:31:41
,PAGES=7
,TYPE=STD
,NAME=S0001463
,Book Name=M-994-SHRIPARTHIV LING PUJA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,